# ādityahṛdayam

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् । रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १
tato yuddhapariśrāntaṁ samare cintayā sthitam । rāvaṇaṁ cāgrato dṛṣṭvā yuddhāya samupasthitam ॥1

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् । उपागम्याब्रवीद्राममगस्त्यो भगवान् ऋषिः ॥ २
daivataiśca samāgamya draṣṭumabhyāgato raṇam । upāgamyābravīdrāmamagastyo bhagavān ṛṣiḥ ॥2

राम राम महाबाहो शृणु गुह्यं सनातनम् । येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३
rāma rāma mahābāho śṛṇu guhyaṁ sanātanam । yena sarvānarīnvatsa samare vijayiṣyasi ॥ 3

आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् । जयावहं जपेन्नित्यम् अक्षय्यं परमं शिवम् ॥ ४
ādityahṛdayaṁ puṇyaṁ sarvaśatruvināśanam । jayāvahaṁ japennityam akṣayyaṁ paramaṁ śivam ॥ 4

सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् । चिन्ताशोकप्रशमनम् आयुर्वर्धनमुत्तमम् ॥ ५
sarvamaṅgalamāṅgalyaṁ sarvapāpapraṇāśanam । cintāśokapraśamanam āyurvardhanamuttamam ॥ 5

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् । पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६
raśmimantaṁ samudyantaṁ devāsuranamaskṛtam । pūjayasva vivasvantaṁ bhāskaraṁ bhuvaneśvaram ॥ 6

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः । एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः ॥ ७
sarvadevātmako hyeṣa tejasvī raśmibhāvanaḥ । eṣa devāsuragaṇām̐llokān pāti gabhastibhiḥ ॥ 7

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः । महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः ॥ ८
eṣa brahmā ca viṣṇuśca śivaḥ skandaḥ prajāpatiḥ । mahendro dhanadaḥ kālo yamaḥ somo hyapāṁ patiḥ ॥ 8

पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः । वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९
pitaro vasavaḥ sādhyā hyaśvinau maruto manuḥ । vāyurvahniḥ prajāprāṇa ṛtukartā prabhākaraḥ ॥ 9

---

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् । सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १०
ādityaḥ savitā sūryaḥ khagaḥ pūṣā gabhastimān । suvarṇasadṛśo bhānurhiraṇyaretā divākaraḥ ॥ 10

---

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् । तिमिरोन्मथनः शम्भुस्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११
haridaśvaḥ sahasrārciḥ saptasaptirmarīcimān । timironmathanaḥ śambhustvaṣṭā mārtāṇḍa aṁśumān ॥ 11

---

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः । अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ॥ १२
hiraṇyagarbhaḥ śiśirastapano bhāskaro raviḥ । agnigarbho 'diteḥ putraḥ śaṅkhaḥ śiśiranāśanaḥ ॥ 12

---

व्योमनाथस्तमोभेदी ऋग्यजुःसामपारगः । घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३
vyomanāthastamobhedī ṛgyajuḥsāmapāragaḥ । ghanavṛṣṭirapāṁ mitro vindhyavīthīplavaṅgamaḥ ॥13

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः । कविर्विश्वो महातेजाः रक्तः सर्वभवोद्भवः ॥ १४
ātapī maṇḍalī mṛtyuḥ piṅgalaḥ sarvatāpanaḥ । kavirviśvo mahātejāḥ raktaḥ sarvabhavodbhavaḥ ॥14

नक्षत्रग्रहताराणामधिपो विश्वभावनः । तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तु ते ॥ १५
nakṣatragrahatārāṇāmadhipo viśvabhāvanaḥ । tejasāmapi tejasvī dvādaśātman namo stu te ॥15

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः । ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६
namaḥ pūrvāya giraye paścimāyādraye namaḥ । jyotirgaṇānāṁ pataye dinādhipataye namaḥ ॥16

जयाय जयभद्राय हर्यश्वाय नमो नमः । नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७

jayāya jayabhadrāya haryaśvāya namo namaḥ I namo namaḥ sahasrāṁśo ādityāya namo namaḥ II 17

नम उग्राय वीराय सारङ्गाय नमो नमः । नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥ १८

nama ugrāya vīrāya sāraṅgāya namo namaḥ I namaḥ padmaprabodhāya mārtāṇḍāya namo namaḥ II 18

ब्रह्मेशानाच्युतेशाय सूर्यादित्यवर्चसे । भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९
brahmeśānācyuteśāya sūryādityavarcase । bhāsvate sarvabhakṣāya raudrāya vapuṣe namaḥ ॥ 19

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने । कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २०
tamoghnāya himaghnāya śatrughnāyāmitātmane । kṛtaghnaghnāya devāya jyotiṣāṁ pataye namaḥ ॥ 20

तप्तचामीकराभाय वह्नये विश्वकर्मणे । नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥२१
taptacāmīkarābhāya vahnaye viśvakarmaṇe । namastamo bhinighnāya rucaye lokasākṣiṇe ॥ 21

नाशयत्येष वै भूतं तदेव सृजति प्रभुः । पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२
nāśayatyeṣa vai bhūtaṁ tadeva sṛjati prabhuḥ । pāyatyeṣa tapatyeṣa varṣatyeṣa gabhastibhiḥ ॥ 22

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः । एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३
eṣa supteṣu jāgarti bhūteṣu pariniṣṭhitaḥ । eṣa evāgnihotraṁ ca phalaṁ caivāgnihotriṇām ॥ 23

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च । यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४
vedāśca kratavaścaiva kratūnāṁ phalameva ca । yāni kṛtyāni lokeṣu sarva eṣa raviḥ prabhuḥ ॥ 24

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च । कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५
enamāpatsu kṛcchreṣu kāntāreṣu bhayeṣu ca । kīrtayan puruṣaḥ kaścinnāvasīdati rāghava ॥ 25

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् । एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥२६॥
pūjayasvainamekāgro devadevaṁ jagatpatim । etat triguṇitaṁ japtvā yuddheṣu vijayiṣyasi ॥ 26

अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि । एवमुक्त्वा तदागस्त्यो जगाम च यथागतम् ॥ २७
asmin kṣaṇe mahābāho rāvaṇaṁ tvaṁ vadhiṣyasi । evamuktvā tadāgastyo jagāma ca yathāgatam ॥ 27

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा । धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८
etacchrutvā mahātejā naṣṭaśoko bhavattadā । dhārayāmāsa suprīto rāghavaḥ prayatātmavān ॥ 28

आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् । त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९
ādityaṁ prekṣya japtvā tu paraṁ harṣamavāptavān । trirācamya śucirbhūtvā dhanurādāya vīryavān ॥ 29

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् । सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३०
rāvaṇaṁ prekṣya hṛṣṭātmā yuddhāya samupāgamat । sarvayatnena mahatā vadhe tasya dhṛto bhavat ॥ 30

अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः । निशिचरपतिसङ्क्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१
atha raviravadannirīkṣya rāmaṁ muditamanāḥ paramaṁ prahṛṣyamāṇaḥ । niśicarapatisaṅkṣayaṁ viditvā suragaṇamadhyagato vacastvareti ॥ 31

॥ इति आदित्यहृदयम् मन्त्रस्य ॥
॥ iti ādityahṛdayam mantrasya ॥

इत्यर्षे श्रीमद्रामायणे वाल्मीकीय आदिकाव्ये
ityarṣe śrīmadrāmāyaṇe vālmīkīya ādikāvye

युद्धकाण्डे पञ्चाधिक शततमसर्गः संपूर्णम्
yuddhakāṇḍe pañcādhika-śatatamasargaḥ saṃpūrṇam